दिभिः पृथक् । द्रव्यावयववैषम्याद्गन्ध एकोविभिद्यते ४४। भावनं ब्रह्मणःस्थानं धारणं सद्विशेषणम् । सर्व्वसत्त्व गुणोद्भेदः पृथिवीवृत्तिलक्षणम् ४५ । नभोगुणविशेषोऽर्थो यस्य तत् श्रोत्रमुच्यते । वायोर्गुणविशेषोऽर्थो यस्य तत् स्पर्शनं विदुः । तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते । अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः भूमेर्गुणविशेषोऽर्थो यस्य प्राणः स उच्यते ४६ । परस्य दृश्यते धर्म्मोह्यपरस्मिन् समन्वयात् । अतो विशेषो भावानां भूमावेवोपलभ्यते ४७ । एतान्यसंहत्य यदा महदादीनि सप्त वै । कालकर्म्मगुणोपेतो जगदादिरुपाविशत् ४८ । ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मात् उदतिष्ठदसौ विराट् । एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः । तोयादिभिः परिवृतं प्रधानेनावृतं बहिः । यत्र लोकवितानोऽयं रूपं भगवतोहरेः ५० । हिरण्मयादण्डकोषादुत्थाय सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्बिभेद खम् ५१। निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् । वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः ५२ । घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः । तस्मात् सूर्य्योऽन्वभिद्येतां कर्णौ श्रोत्रं ततोदिशः ५३ । निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः । ततः ओषधयश्चासन् शिश्नं निर्ब्बिभिदे ततः । रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् । गुदादपानोऽपानाच्च मृत्युर्लोकभयङ्करः ५४ । हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् । पादौ च निरभिद्येतां गतिस्ताभ्यां ततोहरिः ५५ । नाड्योऽस्य निरभिद्यन्त ताभ्योलोहितमाभृतम् । नद्यस्ततः समभवन्नुदरं समभिद्यत । क्षुत्पिपासे ततःस्यातां समुद्रस्त्वेतयोरभूत् । अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ५६ । मनसश्चन्द्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः । अहङ्कारस्ततोरुद्रः चित्तञ्चैत्यस्ततोऽभवत् ५७ । एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् । पुनराविशुः खानि तमुत्थापयितुं क्रमात् । वह्निर्वाचा मुखं भेजे नोदतिष्ठत्ततोविराट् । घ्राणेन नासिके वायुर्नोदतिष्ठत्ततो विराट् । अक्षिणी चक्षुरादित्यो नोदतिष्ठत्ततो विराट् । हस्ताविन्द्रोबलेनैव नोदतिष्ठत्ततो विराट् । विष्णुर्गत्यैव चरणौ नोदतिष्ठत्ततो विराट् । नाड़ीर्नद्यो लोहितेन नोदतिष्ठत्ततो विराट् । क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्ततो विराट् । बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्ततो विराट् । श्रोत्रेण कर्णौ च दिशोनोदतिष्ठत्ततो विराट् । रेतसा शिश्नमापस्तु नोदतिष्ठत्ततो विराट् । गुदं मृत्युरपानेन नोदतिष्ठत्ततो विराट् । रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्ततो विराट् । चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत ५९ । यथा प्रसुप्तं हृदयं प्राणेन्द्रिय मनोन्वयाः । प्रभवन्ति विना येन नोत्थापयितुमोजसा । तमस्मिन् प्रत्यगात्मानं धिया योगविवृत्तया । भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्” ६० । व्याख्यातमेतत् श्रीधरेण “दैवाज्जीवादृष्टवशात् क्षुभिता धर्म्मा गुणायस्याः । योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्य्यं चिच्छक्तिम् । सा प्रकृतिर्म्महत्तत्त्वमसूत । महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलम् १९ । विश्वं अहङ्कारादिप्रपञ्चं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यञ्जन् प्रकटयन् तमोऽपिबत्, कूटस्थः लयविक्षेपशून्यः, आत्मानं प्रस्वापयतीति तथा यत् पूर्व्वं प्रलयसमये महान्तं प्रकृतौ विलापयमासेति २० । प्रसङ्गात् चतुर्व्यूहोपासनमाह यत्तदिति सर्व्वागमप्रसिद्धत्वमाह । स्वच्छं विशदं शान्तं रागादिरहितं भगवतः पदमुपलब्धिस्थानम् । अतएव वासुदेवाख्यं यदाहुः । अयमर्थः अधिभूतरूपेण तस्यैव महानिति, अध्यात्मरूपेण चित्तमिति, उपास्यरूपेण वासुदेव इति, अधिष्ठाता तत्त्वस्य क्षेत्रज्ञः, एवमहङ्कारे सङ्कर्षण उपास्यः,रुद्रोऽधिष्ठाता, मनसि अनिरुद्ध उपास्य ब्रह्माधिष्ठाता, बुद्धौ प्रद्युम्न उपास्य ब्रह्माधिष्ठातेति ज्ञातव्यम् २१ । स्वच्छत्वं भगवद्विभूतिग्राहित्वम् अविकारित्वं लयविक्षेपराहित्यं अपांप्रकृतिः फेनतरङ्गादिरहितावस्थापरा भूतसंसर्गात् प्राक्तनी सा यथा मधुरा स्वच्छा शान्ता च तद्वदित्यर्थः २२ अहङ्कारस्योत्पत्तिपूर्व्वकं लक्षणमाह महत्तत्त्वादिति चतुर्भिः । क्रियासु शक्तिर्यस्य स क्रियाशक्तिः २३ । तस्य त्रैविध्यमाह वैकारिक इति । तस्य कार्य्यमाह यतोयस्मान्मन आदीनाम् भवउत्पत्तिरिति २४ । तस्मिन्नुपास्यंव्यूहमाह सहस्रशिरसमिति २५ । कर्त्तृत्वं देवतारूपेण, करणमिन्द्रियरूपेण, कार्य्यत्वं भूतरूपेण, शान्तत्वादिकं तत्कारणगुणत्रयरूपेण २६ । मनस उत्पत्तिपूर्व्वकं लक्षणमाह वैकारिकादितिद्वाभ्याम् । संकल्पश्चिन्तनम् विकल्पोविशेषचिन्तनं यस्य मनसः संकल्पविकल्पाभ्यां कामसम्भवोवर्त्तते इति कामरूपा वृत्तिर्लक्षणत्वेनोक्ता न तु प्रद्युम्नोत्पत्तिस्तस्य संकल्पादिकार्य्यत्वाभावात् उपास्यव्यूहस्यानिरुद्धस्योक्तेः २७ । शारदं शरत्कालीनमिन्दीवरं नीलोत्पलं